# shrIghaTikAchalahanumatstotram 2

# શ્રીઘટિકાચલહનુમત્સ્તોત્રમ્ ૨

## Document Information

Text title : ghaTikAchalahanumatstotram2

File name : ghaTikAchalahanumatstotram2.itx

Category : hanumaana, stotra

Location : doc_hanumaana

Transliterated by : Processed by Sowmya Ramkumar

Proofread by : PSA Easwaran

Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication

Latest update : September 19, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીઘટિકાચલહનુમત્સ્તોત્રમ્ ૨

શઙ્ખચક્રધરં દેવં ઘટિકાચલવાસિનમ્ ।
યોગારૂઢં હ્યાઞ્જનેયં વાયુપુત્રં નમામ્યહમ્ ॥ ૧॥

ભક્તાભીષ્ટપ્રદાતારં ચતુર્બાહુવિરાજિતમ્ ।
દિવાકરદ્યુતિનિભં વન્દેઽહં પવનાત્મજમ્ ॥ ૨॥

કૌપીનમેખલાસૂત્રં સ્વર્ણકુણ્ડલમણ્ડિતમ્ ।
લઙ્ઘિતાબ્ધિં રામદૂતં નમામિ સતતં હરિમ્ ॥ ૩॥

દૈત્યાનાં નાશનાર્થાય મહાકાયધરં વિભુમ્ ।
ગદાધરકરો યસ્તં વન્દેઽહં મારુતાત્મજમ્ ॥ ૪॥

નૃસિંહાભિમુખો ભૂત્વા પર્વતાગ્રે ચ સંસ્થિતમ્ ।
વાઞ્છન્તં બ્રહ્મપદવીં નમામિ કપિનાયકમ્ ॥ ૫॥

બાલાદિત્યવપુષ્કં ચ સાગરોત્તારકારકમ્ ।
સમીરવેગં દેવેશં વન્દે હ્યમિતવિક્રમમ્ ॥ ૬॥

પદ્મરાગારુણમણિશોભિતં કામરૂપિણમ્ ।
પારિજાતતરુસ્થં ચ વન્દેઽહં વનચારિણમ્ ॥ ૭॥

રામદૂત નમસ્તુભ્યં પાદપદ્માર્ચનં સદા ।
દેહિ મે વાઞ્છિતફલં પુત્રપૌત્રપ્રવર્ધનમ્ ॥ ૮॥

ઇદં સ્તોત્રં પઠેન્નિત્યં પ્રાતઃકાલે દ્વિજોત્તમઃ ।
તસ્યાભીષ્ટં દદાત્યાશુ રામભક્તો મહાબલઃ ॥ ૯॥

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

*shrIghaTikAchalahanumatstotram 2*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*